चरीच्छृदम् २ ; } [1]छर्दिः.
चरीच्छृदित्वा २;

(574) "छृदी सन्दीपने" (X-चुरादिः-1821. सक. सेट्.उभ. आधृषीयः)

'छृद्–' इति केचित् पठन्ति ।

'छृदी सन्दीपने वा णौ छर्दयेच्छर्दतीत्युभे ।
छृन्ते छृणत्तीति पदे दीप्तिदेवनयोः श्रमि ॥' (श्लो. 115) इति देवः ।

अस्य धातोः आधृषीयत्वेन णिज्विकल्पः । ण्यन्तात्, णिजभावपक्षे शुद्धात् शुद्ध-प्रकृतिकसन्नन्तात्-यङन्ताच्च छर्दकः दिका, छर्दकः-र्दिका, [2]चिच्छर्दिषकः-षिका, चरीच्छृदकः-दिका ; इत्यादीनि सर्वाण्यपि रूपाणि रौधादिकछर्दतिवत् (573) ज्ञेयानि । निष्ठायाम्-[A]छर्दितः । ण्यन्तात् सनि तु इमानि रूपाणीति विशेषः ।

चिच्छर्दयिषकः-षिका, चिच्छर्दयिषिता-त्री, चिच्छर्दयिषन्-न्ती, चिच्छर्दयिषिष्यन्-न्ती-ती, चिच्छर्दयिषमाणः, चिच्छर्दयिषिष्यमाणः, [3]चिच्छर्दयिट्-यिषौ-यिषः, चिच्छर्दयिषितः-तवान्, चिच्छर्दयिषुः, चिच्छर्दयिषितव्यम्, चिच्छर्दयिषणीयम्, चिच्छर्दयिष्यम्, ईषच्चिच्छर्दयिषः-दुश्चिच्छर्दयिषः-सुचिच्छर्दयिषः, चिच्छर्दयिष्यमाणः, चिच्छर्दयिषितुम्, चिच्छर्दयिषा, चिच्छर्दयिषणम्, चिच्छर्दयिषित्वा, प्रचिच्छर्दयिष्य, चिच्छर्दयिषम् २, चिच्छर्दयिषित्वा २.

(575) "छृप संदीपने" (X-चुरादिः-1821. सक. सेट्. उभ. आधृषीयः।)

'छृदी सन्दीपने' इत्यस्य, क्षीरस्वामिसंमतपाठ एवम् ।

छर्पकः-र्पिका, चिच्छर्पयिषकः-षिका, छर्पकः र्पिका, चिच्छर्पिषकः-षिका,

---

1. औणादिके [ द. उ. 9-30 ] इसिप्रत्यये छर्दिः=वमिः । छर्दयतीति छर्दिः ।
2. 'सेऽसिचि—' (7-2-57) इति इड्विकल्पः नास्य धातोर्भवति । तत्र रुधादि-साहचर्येण, 'उ छृदिर्—' इति रौधादिकधातोरेव ग्रहणात् । अत एवात्र धातौ ईदित्करणं सार्थकम् । अन्यथा, णिजभावपक्षे, 'सेऽसिचि-' (7-2-57) इतीड्विकल्पनेन, 'यस्य विभाषा' ( 7-2-15) इतीण्णिषेधे सिद्धे ईदित्करणं व्यर्थं स्यात् । प्रकृते तु णिजभावपक्षे शुद्धे 'श्वीदितः—' (7-2-14) इतीण्णिषेधः ।
3. अतो लोपे जश्त्वचर्त्वयोः रूपम् ।

A. 'प्रजहार हरिं रणेष्वतर्पन् सुहृदं छर्दितमन्युरप्रदर्भन् ॥' धा. का. 3.49.